Shri Mangala Ambashtakam

श्रीमङ्गलाम्बाष्टकम्

Document Information

Text title : Mangala Ambashtakam

File name : mangalAmbAShTakam.itx

Category : devii, devI, aShTaka

Location : doc_devii

Transliterated by : Rajani Arjun Shankar

Proofread by : Rajani Arjun Shankar

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 4, 2024

sanskritdocuments.org

श्रीमङ्गलाम्बाष्टकम्

श्री कुम्भघोण नगराम्बुधि-चन्द्रकान्ते
श्री कुम्भनाथ-हृदयाम्बुज-भानुकान्ते ।
श्रीमद्-गजानन-कुमार-सवित्रि सौम्ये
श्रीमङ्गलाम्ब मयि देहि कृपा-कटाक्षम् ॥ १॥

स्वर्णाचलाकलित-कार्मुक-चित्तगेहे
स्वर्ण-प्रदान-निरते नमतां नराणाम् ।
स्वर्गौकसामपि कृपापर-धूतभीते
श्रीमङ्गलाम्ब मयि देहि कृपा-कटाक्षम् ॥ २॥

मन्दार-मूल-विलसन्-मणि-मण्टपस्थे
मन्मानसाम्बुरुह-मन्थर-मत्त-भृङ्गि ।
मन्दस्मिताञ्चित-मनोज्ञ-मुखारविन्दे
श्रीमङ्गलाम्ब मयि देहि कृपा-कटाक्षम् ॥ ३॥

कर्णावलम्बि-मणिकुण्डल-मण्डितास्ये
स्वर्णोपवीत-रुचिरम्य-भुजान्तराले ।
पर्णाम्बु-मूल-पवनाशि-मुनीन्द्र-मान्ये
श्रीमङ्गलाम्ब मयि देहि कृपा-कटाक्षम् ॥ ४॥

अम्ब त्वदीय-मुखचन्द्रज-चन्द्रिकाप्तं
अम्भोधि-तुल्यमतिवेलमिदं पुरं नः ।
यद्वै विदुः किल पुरामुपमानमेकं
श्रीमङ्गलाम्ब मयि देहि कृपा-कटाक्षम् ॥ ५॥

श्री-मन्त्रपीठ-निलयेऽम्ब महातिमाये
चिन्तामणे श्रितपदां पुरुषार्थदाने ।
सच्चित्-सुखैक-घनरूपिणि सर्वमातः
श्रीमङ्गलाम्ब मयि देहि कृपा-कटाक्षम् ॥ ६॥

लीला तवेयमखिलाखिल-लोकमाला
बालास्तवाम्ब निखिला जगतां च पालाः ।
मूलादिवाकलयितुं तव कोऽपि नालं
श्रीमङ्गलाम्ब मयि देहि कृपा-कटाक्षम् ॥ ७॥

स्रष्टा सृजत्यखिलमम्ब तवाज्ञयैव
युक्तस्तदेव परिपाति च वारिजाक्षः ।
अन्ते हरत्यपि हरस्त्वदनुज्ञयैव
श्रीमङ्गलाम्ब मयि देहि कृपा-कटाक्षम् ॥ ८॥

नारायणाख्य-कविगीतमिदं च गीतं
श्रीमङ्गलाष्टकमहो भुवि ये पठन्ति ।
तेषां समृद्धिमतुलामिह देहि मातः
श्रीमङ्गलाम्ब मयि देहि कृपा-कटाक्षम् ॥ ९॥

मङ्गलाम्बाष्टकमिदं नारायण-मुखोद्गतम् ।
पठतां शृण्वतां चापि मङ्गलं स्यात् पदे पदे ॥ १०॥

इति श्रीमङ्गलाम्बाष्टकं सम्पूर्णम् ।

Encoded and proofread by Rajani Arjun Shankar

Shri Mangala Ambashtakam
pdf was typeset on May 4, 2024

Please send corrections to *sanskrit@cheerful.com*